# मंगलाबाई भागवत फाउंडेशन

विषय : संस्कृत (संपूर्ण)

समय : दोरात्रयम् | कक्षा : दशमी | अङ्का: – ८०

सूचना :
१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।
२) यथासूचनं आकलनकृतय: व्याकरणकृतय: आरेखितव्या: ।
३) आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम् ।

## प्रथम विभाग : सुगमसंस्कृतम् । (८ गुणा:)

**प्र. 1. अ) चित्रं दृष्ट्वा नामानि लिखत । (5 त: 4)** **(4)**




**आ) सङ्ख्या अक्षरै:/अङ्कै: लिखत । (3 त: 2)** **(2)**

1) एकोनविंशति: 2) ८७ 3) ४९

**इ) समय-स्तम्भमेलनं कुरुत ।** **(2)**

| 'अ' | आ |
|---|---|
| १) दशोन-चतुर्वादनम् | ९.५१ |
| २) नवोन-दशवादनम् | ५.१० |
| ३) सपाद-दशवादनम् | ३.५० |
| ४) दशाधिक-पञ्चवादनम् | १०.१५ |

...२.

आ) गद्यांश पठित्वा निर्दिष्टा: कृती: कुरुत । (7)

द्वितीयः प्रसङ्गः । यस्माद् ज्ञानं लभते स गुरुः ।

एकस्मिन् दिने आचार्यः शिष्यगणेन सह गङ्गास्नानार्थम् अगच्छत्। तदा मार्गे कोऽपि दरिद्रः मलिनकायः,जीर्णवस्त्रधारी मनुष्यः तस्य पुरतः आगच्छत्। तं दृष्ट्वा शिष्याः तम् 'अपसर, अपसर' इति उच्चैः अवदन् ।

सः मनुष्यः अपृच्छत् – "अपसर, अपसर इति कं वदसि? शरीरं वा आत्मानं वा? आत्मा तु परमेश्वरस्य अंशः अतः सर्वेषां समानः एव । तथा च सर्वेषां शरीराणि पञ्चमहाभूतात्माकानि । तर्हि कथं तव शरीरं मम शरीराद् भिन्नम् अहं च त्वद् भिन्न:?" वेदान्ततत्त्वस्य सारं तस्य मुखात् श्रुत्वा आचार्यः तं प्रणनाम। ज्ञानं तु कस्मादपि ग्राह्यम् । यस्माद् ज्ञानं लभते स गुरुरेव इति विचारेण आचार्य: तत्रैव 'मनीषापञ्चकम्' इति स्तोत्रं रचितवान्।

एवम् आसेतुहिमालं पर्यटन् अद्वैत सिद्धान्तस्य प्रचारम् अकरोत् सः ।

अष्टवर्षे चतुर्वेदी, द्वादशे सर्वशास्त्रवित् । षोडशे भाष्यं, द्वात्रिंशे मुनिरभ्यगात् ।।

१) अवबोधनम् । (4 त: 3) (3)

क) योग्य पर्यायं चित्वा वाक्यं पुनर्लिखत । (1)

१) (शङ्कराचार्य:/शिष्य:) दरिद्रं, मलिनकायं पुरुषम् 'अपसर' इति अवदत् ।

२) तत्वज्ञानं (भाषणे/आचरणे) द्रष्टव्यम्।

ख) पूर्णवाक्येन उत्तरं लिखत । (1)

वेदान्ततत्त्वस्य किं सारं दरिद्र: मनुष्य: कथितवान्?

ग) वाक्यं पुनर्लिखित्वा सत्यम् वा असत्यम् वा इति लिखत । (1)

शङ्कराचार्यः अद्वैत-सिद्धान्तस्य प्रचारकः ।

घ) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत । (1)

तदा मार्गे कोऽपि मनुष्य: तस्य पुरत: आगच्छत् ।

२) शब्दज्ञानम् (3 तः 2) (2)

क) गद्यांशात् 2 पञ्चमी-विभक्त्यन्तपदे चित्वा लिखत । (1)

ख) विशेषणं चित्वा लिखत। (1)

१) ------------------- शरीराणि । २) ------------------- प्रसङ्गः ।

ग) पूर्वपदं /उत्तरपदं लिखत । (1)

१) कस्मादपि ------------------- + अपि ।

२) तत्रैव = तत्र + ------------------- ।

३) पृथक्करणम् । (2)

जालरेखाचित्रं पूरयत ।




**द्वितीयः विभागः - गद्यम्। (२० गुणाः)**

**प्र. 2. अ) गद्यांश पठित्वा निर्दिष्टाः कृतीः कुरुत। (7)**

आसीत् सुदासो नाम कश्चिदुद्यानपालः । तस्य तडागे कदाचित् सत्यपि शिशिर-ऋतावेकं पद्मं व्यकसत्, व्योम्नीव बालसूर्यबिम्बम् । सोऽचिन्तयत् 'अहो महिमा परमात्मनः, यदेतादृशे कालेऽतिशीते विभूषितो मे तडाग एतस्य सरसिजस्य विकासेन। एतत् सरसिजं विक्रीयाहं विपुलं धनं प्राप्नुयाम्' इति। एवं सञ्चिन्त्य स तद् विक्रेतुं राजसद्मनः पुरतः स्थितः। अत्रान्तरे तेनैव अध्वना कश्चित् श्रीमान् सार्थवाहः समायातः । सोऽवदत्, 'भद्र, भगवान सुगतः सम्प्रत्येतस्मिनगरे वसति । महात्मनः तस्य पूजार्थमिदं कमलमभ्यर्थये । तत्कियता मूल्येन ददासि ? । उद्यानपालोऽब्रवीत् 'एकेन सुवर्णनाणकेन । अथ स सार्थवाहः यावत्तत् कमलं क्रेतुमिच्छति तावदेवापरो धनवान् श्रेष्ठ अपि सुगतदर्शनार्थं गच्छन् तत्र समुपस्थितः। नौरजमूल्यं पृच्छन्तं तं श्रेष्ठिनम् उद्यानपालोऽब्रूत एष महाभाग । एकं सुवर्णनाणकम् एतस्यार्थे दातुमिच्छति'। श्रेष्ठी अगदत् 'अहं दश सुवर्णनाणाकानि यच्छामि' । सार्थवाहोऽभणत् । 'अहं शतं सुवर्णनाणकानि प्रयच्छामि'। तयोर्विवादं श्रुत्वा सुदासो व्यमृशत् 'यस्य कृते एतौ कमलमेतत् क्रेतुमिच्छतः, नूनं सुगत एवाधिक मूल्यं मह्यं दद्यात्' इति। अतः स उद्यानपालस्तावभाषत 'नैतद भी विक्रेतुमिच्छामि' इति।

१) अवबोधनम् (4 तः 3) (3)

क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । (1)

सुदासः राजसद्मनः पुरतः स्थितः यतः ----------

१) सः सरसिजं विक्रेतुम् इच्छति स्म।

२) सः राजानं द्रष्टुम् इच्छति स्म ।

...४.

ख) कः कं वदति ? (1)

नैतद् भो विक्रेतुम् इच्छामि ।

ग) पूर्णवाक्येन उत्तरं लिखत । (1)

कस्य पूजार्थं श्रेष्ठी सार्थवाहः च कमलं क्रेतुम् इच्छतः स्म ?

घ) एषः गद्यांशः कस्मात् पाठात् उध्दृतः ? (1)

२) शब्दज्ञानम् । (3 तः 2) (2)

क) गद्यांशात् 2 पूर्वकालवाचक–धातुसाधित–ल्यबन्त–अव्यये चित्वा लिखत । (1)

ख) प्रश्ननिर्माणं कुरु (1)

शिशिरऋतौ पद्मं व्यकसत् ।

ग) लकार लिखत । (1)

उद्यानपालः अब्रूत ।

३) पृथक्करणम् । (2)

क्रमेण योजयत ।

१) श्रेष्ठिनः सार्थवाहस्य च विवादः ।

२) शिशिर पस्य विकासः ।

३) सुदासः विक्रयणार्थं राजसदनः पुरतः स्थितः ।

४) सुदासस्य धनप्राप्तेः इच्छा ।

इ) माध्यमभाषया सरलार्थं लिखत । (2 तः 1) (4)

१)

सूत: – धृता: प्रग्रहा:। अवतरतु आयुष्मान् ।

दुष्यन्त: – (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावत् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिन: दृष्ट्वाऽहमपावर्ते तावदार्द्रपृष्ठा: क्रियन्तां वाजिन: ।

सूत: – तथा । (इति निष्क्रान्त: ।)

२)

कर्ण: – दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि ।

शक्र: – (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत । यदि न वदेयम् मूढ इति मां परिभवति । तस्माद् उभयं परिहृत्य किं नु खलु भाषे ? भवतु, दृष्टम् । (प्रकाशम्) भो: कर्ण, सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यश:।

कर्ण: – भगवन्, किं नोक्तम् दीर्घायुर्भवेति ? अथवा यदुक्तं तदेव शोभनम् । यत: हतेषु देहेषु गुणा: धरन्ते ।

इ) माध्यमभाषया उत्तरं लिखत । (2 तः 1) (2)

१) पृथुवैन्यः धरित्र्याः उपदेशम् अनुसृत्य किं किम् अकरोत् ?

२) कणादमहर्षिः परमाणुविषये किं प्रतिपादितवान् ?

## तृतीयः विभागः - पद्यम्। (१८ गुणाः)

प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (4)

रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥१॥
प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा: नारिकेलाः नराणाम् ।
ददति जलमनल्पास्वादमाजीवितान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ॥२॥

१) पद्यांशं पठित्वा निर्दिष्टेः कृतीः कुरुत । (3 तः 2) (2)

क) पूर्णवाक्येन उत्तरं लिखत । (1)

महतां क्रियासिद्धिः कस्मिन् भवति ?

ख) विशेषण-विशेष्ययोः मेलनं कुरुत । (1)

| 'अ' | आ |
|---|---|
| १) अल्पम् | महताम् |
| २) अपारस्य | तोयम् |
| | नभसः |

ग) उत्तरपदं लिखत । (1)

१) नोपकरणे = न + --------------- ।

२) कृतमुपकारम् = कृतम् + --------------- ।

२) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत । (2)



आ) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत । (2 तः 1) (2)

१) मनुष्य: स्वकर्मण: कीदृशं फलं लभते ?

२) 'कं संघजान' इति श्र्लोकं माध्यमभाषया स्पष्टीकुरुत ।

इ) पद्ये शुद्धे पूर्णे च लिखत । (क, ख त: । ग,घ त: ।)

१) क) रे रे चातक ------------ दीनं वच: ।। (4)

अथवा

ख) यदा किञ्चिज्ञोऽहम् ---------- व्यपगत: ।।

२) ग) वैद्यराज ----------- धनानि च ।। (2)

अथवा

घ) तावद् ---------- यथोचितम् ।।

ई) अन्वयं पूरयत । (2)

--------- वस्तूनाम् अपि -------- कार्यसाधिका (अस्ति) । यथा ------- आपन्नै ------ मत्तदन्तिन: बध्यन्ते ।

उ) माधमभाषया सरलार्थं लिखत । (3 तः 2) (2)

१)

| |
|---|
| शीलं सद्गुणसम्पत्ति: ज्ञानं विज्ञानमेव च ।<br>उत्साहो वर्धते येन वाचनं तद् हितावहम् । |

२)

| |
|---|
| एकीभूय यथा सर्वे वर्णा: गच्छन्ति शुक्लताम् ।<br>तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् । |

३)

| |
|---|
| मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।<br>दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुता: ।। |

**चतुर्थ: विभागः - लेखनकौशलम्। (९ गुणाः)**

प्र. ४. अ) धातूनाम् अव्ययानां च विशिष्ट-विभक्ते: उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (6 तः 4) (4)

क) परित: ख) अलम् ग) विना

घ) वि + रम् (१ प.) च) स्पृह् (१० प.) छ) दा-यच्छ् (१ प.)।

संस्कृतानुवादं कुरुत । (6 तः 4)

१) रोगभयाने सर्व लोक घरीच राहिले — All the people stayed at home on Account of the fear of disease.

२) विद्या हेच माणसाचे खरे भूषण आहे. — Education is the only real ornament of man

३) मी नवीन की-बोर्ड विकत घेणार आहे. — I shall buy a new keyboard.

४) ती पुस्तक वाचण्यात मग्न झाली होती. — She was engrossed in reading a book.

५) आदित्य नेहमी खाण्याविषयीच बोलतो. — Aditya always talks about eating.

६) आम्ही पुस्तक खरेदीसाठी निघालो आहोत. — We have set out for purchasing the books.

आ) ५/७ वाक्यत्मकं निबन्धं लिखत । (3 तः 1) (5)

१) मम प्रियः नेता । २) मम प्रिय भाषा । ३) मम प्रियः खगः ।

अथवा

साहाय्यक-शब्दानाम् आधारेण ५/७ वाक्यात्मकं चित्रवर्णनं कुरुत ।




(मञ्जूषा – वपित, कर्षति, सम्भाषणम्)

**पञ्चमः विभागः – भाषाभ्यासः। (१७ गुणाः)**

प्र. ४. अ) तालिकापूर्तिं कुरुत । **(8)**

१) नामतालिकां पूरयत । (6 तः 4) (2)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| मनसि | --------- | --------- | सप्तमी |
| --------- | मातृभ्याम् | --------- | पञ्चमी |
| --------- | --------- | वाग्भिः | तृतीया |

२) सर्वनामतालिकां पूरयत । (6 तः 4) (2)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| मनसि | --------- | सर्वे | प्रथमा |
| --------- | आवयोः नौ | --------- | षष्ठी |
| तस्यै | --------- | --------- | चतुर्थी |

३) क्रियापदतालिकां पूरयत । (6 तः 4) (2)

| लकाराः | एकचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लृट् | नेष्यते | ------ | ------ | प्रथमः पुरुषः |
| विधिलिङ् | --------- | पिबेतम् | ----- | मध्यमः पुरुषः |
| लङ् | --------- | ------ | आस्म | उत्तमः पुरुषः |

४) धातुसाधित-विशेषण-तालिका । (6 तः 4) (2)

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| वन्द् (१ आ.) | ------ | -------- | वन्द्यः | वन्दमानः |
| दृश्-पश्य् (१ प.) | दृष्टः | -------- | ------ | पश्यन् |
| कथ् (१०.उ.) | ------ | कथितवान् | ----- | कथयन्/कथयमानः |

आ) निर्दिष्टाः कृतीः कुरुत । (4 तः 3) (9)

(१) योग्यं रुपं लिखित्वा रिक्त स्थानपूर्तिं कुरुत । (5 तः 3) (3)

(क) ................ (४) युगानि वर्तन्ते । (सङ्ख्यावाचकम्)

(ख) सप्ताहस्य .................(२) वैद्यराजः अत्र आगच्छति । (आवृत्तिवाचकम्)

(ग) सङ्गीते ..............(७) स्वराः सन्ति । (सङ्ख्यावाचकम्)

(घ) वर्षस्य .............. (३) वयम् अत्र सम्मिलामः । (आवृत्तिवाचकम्)

(२) **समासानां तालिकापूर्तिं कुरुत । (5 तः 3)** (3)

| समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|
| (क) ................ | अहनि अहनि | अव्ययीभावः । |
| (ख) चरणविकलः | .............. | तृतीया-तत्पुरुष । |
| (ग) ................. | महान् ऋषिः | कर्मधारयः । |
| (घ) द्विप : | द्वाभ्यां पिबति इति | ............. । |
| (च) अल्पधीः | ............... | बहुव्रीहिः । |

...९.

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । (5 तः 3)** (3)

(क) आयान्ति x .................. । (ख) आभरणनि = .................. ।

(ग) अम्भोदाः = .................. । (घ) पातु = .................. ।

(च) चला x .................. ।

**४) सूचनानुसारं कृतीः कुरुत । (5 तः 3)** (3)

(क) जनै : कनकं परीक्ष्यते । (वाच्यपरिवर्तनं कुरुत ।)

(ख) सुदास : तद् विस्मृत्य सुगतचरणे कमलं समर्पितवान् । (पूर्वकालकवाचकं निष्कासयत ।)

(ग) भवान् स्वीकारोतु । ('भवान्' इत्यस्थ स्थाने 'त्वम्' योजयत ।)

(घ) यो जानाति स पण्डितः । (बहुवचने परिवर्तयत।)

(च) शृगालः मृगं क्षेत्रं दर्शयति । णिजन्तं निष्कासयत।)

**षष्ठः विभागः – अपठितम्ः। (८ गुणाः)**

**प्र. ४. अ) तालिकापूर्तिं कुरुत ।** **(4)**

| |
|---|
| दुर्गापूजामहोत्सवार्थं देव्याः मूर्तिं क्रीत्वा बालनरेन्द्रः गृहं प्रति प्रस्थितः । मण्डलाधिकारिणः अश्वयानं मार्गे वेगेन धावति इति तेन दृष्टम् । काचन क्रीडामग्ना बालिका ततफ न जानाति । तदफ विलोक्य तस्य हस्तात् मूर्तिः पतिता भग्ना च । तेन धावित्वा बालिकां अश्वमार्गात् दूरीकृत्य तस्याः मात्रे प्रदान । यदा सः आत्मानम् अपराधिनं मतवा अखिद्यत सदा माता अवदत् "यद्यपि त्वया मूर्तेः पूजा न कृता तथापि बालिकारक्षणं कृत्वा बालिकारूपदेव्याः पूजा कृता । अतः विरम शोकात् ।" धन्या सा माता धन्यश्च नरेन्द्रः । |

१) पूर्णवाक्येन उत्तरं लिखत । (1)

नरेन्द्रः आत्मानं केन कारणेन अपराधिनम् अमन्यत ?

२) प्रातिपदिकं लिखत । (1)

(क) देव्याः (ख) त्वया ।

३) वाक्यं पुनर्लिखित्वा सत्यम् वा असत्यम् वा इति लिखत । (1)

नरेन्द्रस्य माता प्रतिमापूजनात् मानवसेवां महत्त्वपूर्णाम् अमन्यत ।

४) माध्यमभाषया सरलार्थं लिखत । (1)

देव्याः मूर्तिं क्रीत्वा बालनरेन्द्रः गृहं प्रस्थितः ।

५) गद्यांशात् लोट्लकारस्य रूपं चित्वा लिखत । (1)

६) कारकपरिचयं कुरुत । (1)

तेन बालिका मात्रे दत्ता ।

**आ) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत । (4)**

दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ।। १ ।।
वृथा वृष्टि: समुद्रेषु वृथा तृप्तस्य भोजनम्
वृथा दानं समर्थस्य वृथा दीपो दिवापि च ।। २ ।।

१) (क) पूर्णवाक्येन उत्तरत । (2 तः 1) (1)

१) मारुति: कस्य पुरत: तिष्ठति ?

२) 'सीता' इत्यर्थे क: शब्द: प्रथमश्लोके प्रयुक्त: ?

ख) समानार्थकं शब्दं लिखत । (1)

वन्दे = --------

२) पद्यांश पठित्वा जालरेखाचित्रं पूरयत । (2)




******